## विनयादिभ्यष्ठक्। (३४/२१०२)

विनय इत्येवमादिभ्यः[1] स्वार्थे ठक् प्रत्ययो भवति। विनय एव वैनयिकः। सामयिकः। औपयिकः। [2]विभाषाग्रहणेन प्रत्ययो विकल्प्यते।

विनय। समय। 'उपायाद्ध्रस्वत्वं च' (ग. सू. १५४)। सङ्गति। कथञ्चित्। अकस्मात्। समयाचार। उपचार। समाचार। [3]व्यवहार। सम्प्रदान। समुत्कर्ष। समूह। विशेष। अत्यय[4]। [5]विनयादिः॥

## वाचो व्याहृतार्थायाम्। (३५/२१०३)

[6]व्याहृतः प्रकाशितोऽर्थो यस्यास्तस्यां वाचि वर्तमानाद् वाच्शब्दात् स्वार्थे ठक्प्रत्ययो भवति। पूर्वमन्येनोक्तार्थत्वात् सन्देशवाग् व्याहृतार्था इत्युच्यते। वाचिकं [7]कथयति। वाचिकं श्रद्दधे। व्याहृतार्थायाम् इति किम्? मधुरा वाक् देवदत्तस्य॥

## तद्युक्तात् कर्मणोऽण्। (३६/२१०४)

व्याहृतार्थया वाचा यत् कर्म [8]युक्तं, तदभिधायिनः कर्मशब्दात् स्वार्थे अण् प्रत्ययो भवति। [9]कर्म एव कार्मणम्। वाचिकं श्रुत्वा तथैव यत् कर्म [10]क्रियते तत् कार्मणम् इत्युच्यते।

[६३१] अण्प्रकरणे कुलालवरुडनिषाद[11]कर्मारचण्डालमित्रामित्रेभ्यश्छन्दस्युपसङ्ख्यानम्। (म.भा.२.४३५)

कुलाल एव कौलालः (का. ३४. १.७)। वारुडः। 'नैषादः' (वा.सं. ३०.८)। '[12]कार्मारः' (ऋ. ९.११२.२)। 'चाण्डालः' (वा. सं ३०. ११)। 'मैत्रः' (वा. सं. ३९.५)। 'आमित्रः' (ऋ. ६. २८. ३)।

[६३२] सान्नायानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाः। एतेऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते (म. भा. २. ४३५)।

'सान्नाय्यम्' (तै.सं. २.५.३.७)। 'आनुजावरः' (तै.सं. २. ३. ४. २)। 'आनुषूकः' (तै.सं. २.३.४.४)। आष्टुभः। 'चातुष्प्राश्यः' (काठ.सं.८. १०)। 'राक्षोघ्नम्' (तै.सं.५.१. १०. २)। वैयातः। वैकृतः। 'वारिवस्कृतः' (तै.सं. ४. ५. २.२)। 'आग्रायणः' (मै.सं. २. ७. १९)। आग्रहायणः। 'सान्तपनः' (वा सं. १७. ८५)॥

## ओषधेरजातौ। (३७/२१०५)

ओषधिशब्दादजातौ वर्तमानात् स्वार्थेऽण्प्रत्ययो भवति। औषधं पिबति। औषधं ददाति। अजातौ इति किम्? ओषधयः [13]क्षेत्रे रूढा भवन्ति॥

---

1. प्रातिपदिकेभ्यः इत्यधिकम् ब. क. 2. महा इत्यधिकम् क. 3. सव्यवहार क. 4. अनत्ययः संदेशः इत्यधिकम् क. 5. नास्ति फ. 6. संदेशः इत्यधिकम् क, अन्येन इत्यधिकम् ड. 7. चिन्तयति ड. 8. युक्तं नास्ति क. 9. कर्मैव कार्मणः ह. 10. करोति क. 11. कर्मार नास्ति क. म. भा. 12. कार्मारः नास्ति क. 13. क्षेत्रे जाताः ह, क्षेत्रसुरा भवन्ति ड.